Along with the repeal of Section 377, there is an urgent need for the enactment of a comprehensive sexual assault law which firstly, broadens the definition of sexual assault beyond the limited scope of 'penile penetration" (heterosexual or homosexual); and secondly differentiates assault on minors and adults. Such a law should also determine a common age of consent for sexual activity (lesbian, gay or heterosexual).

**1.4 PROTECTION FROM HUMAN RIGHTS ABUSES/HATE CRIMES**

Men and women who are identifiably, openly lesbian and gay face violence and the persistent threat of violence. This may take the form of verbal and physical assault on the streets, death threats, and even murder. This has been justified "because he/she was gay".

It also takes the form of psychological violence on men and women who are subjected to shock therapy, aversion therapy and incarceration as "treatment" for their "problem". Many women have gone through the humiliation and trauma of having their bodies mutilated in this "normalisation" process. This happens even for women who are not transsexual (Le, who does not feel that they were born into the wrong sex or in the wrong body). In a society which sees the Possibility/of a relationship only between men and women, women who love women are considered aberrations and the medical community thus "cures" them by these extreme steps.

In 1994, after a 17 year debate, Amnesty International finally recognized violence against lesbians and gays as a human rights abuse in its book, “Breaking the Silence: Human Rights Violations on the Basis of Sexual Orientation”.

**1.5 ANTI-DISCRIMINATION/ EQUAL OPPORTUNITY LAWS**

The law reflects the prejudices and norms of existing societies, and thus marginalizes some members within the framework of society. This is the case all over the world. But it need not be so. In fact, the law should help counter the prejudices and protect the rights of marginalized sections. This would mean having clear anti-discrimination laws for the threatened communities. The enactment of such legislation would ensure that the rights of lesbians and gay men are protected

particularly in the areas of housing, education, employment, insurance and health care.

Article 2 of the Universal Declaration of Human Rights states that, "No person should be discriminated against on the basis of race, sex, religion, caste, colour, or any other status." Many countries have introduced "Sexual Orientation" as a clause within this anti-discrimination framework.

**1.6 POSITION IN US**

Most states in the USA had sodomy statues of their own, and those that did not, incorporated the common law principles from the old English laws. At least half the statues still retain sodomy statues defining it variously. The age of consent also varies.

Foreigners/immigrants found to be homosexual are liable to be deported immediately. Homosexuals, both gay men and lesbians, are barred from the armed forces. Since 1943, when military psychiatrists redefined homosexuality as a medical disorder rather than a crime, the US armed forces have ousted between 80,000 and 100,000 gay men and lesbians.

**1.7 POSITION IN INDIA**

In India, homosexuality has traditionally been tolerated, even celebrated, although the Manu Smriti pronounces severe punishments for male as well as female homosexuality. The Kamasutra contains an entire chapter entitled 'Auparishtaka' (oral congress) and Vatsyayana, the author insists that the practice is permitted by the orders of the holy writ (Dharma Shastras) with just a few exceptions. One of the forms in which Shiva is worshipped is Ardhanarishwara, containing both the male and the female energies.

Alain Danielou in his book "Shiva and Dionysius" examines the tantric rite of anal penetration and goes on to state "the hermaphrodite, the homosexual and the transvestite have a symbolic value and are considered privileged beings, images of Ardhanarishwara.

The British obviously found the practice unchristian and abhorrent and in 1860, enacted the Indian Penal Code which in Section 377 states:

**"Unnatural offences-** Whoever voluntarily has carnal intercourse against the order of nature with any man, woman or animal shall be punished with imprisonment for life, or with imprisonment or either description for a term which may extend to 10 years, and shall also be liable to fine".

***Explanation.-*** Penetration is sufficient to constitute the carnal intercourse necessary to the offence described in this section The exact scope of this vague definition - "carnal intercourse against the order of nature" - has been a major subject of debate in the existing case law. It has generally been interpreted to include acts of anal sex (*coitus per annum*) as well as oral sex (*coitus per os*) between males. The possibility of this definition being extended to heterosexual acts of anal or oral sex also exists, but has not been tested. Consent of the other party is completely irrelevant for conviction, but it may be a relevant consideration while

fixing the quantum of punishment.

## 1.8 RIGHT TO PRIVACY

In 1955, the American Law Institute Model Penal Code stated that every individual is entitled to protection "against state interference in his personal affairs when he is not harming others" and eliminated the sodomy statues. In 1957, the Wolfenden Committee (UK) stated that "it is not the function of criminal law to intervene in the lives of citizens or to seek to enforce any particular pattern of behaviour. There must remain a realm of private morality and immorality which is in brief and crude terms, not the law's business." After examining extensive data and various arguments for and against. It recommended that private consensual sexual activity between adult males be removed from the operation of criminal law.

The Constitution of India guarantees that "No person shall be deprived of his life or personal liberty except according to procedure established by law." (Article 21). The provision has been through considerable judicial interpretation and a fledgling right to privacy has been read into the right to life and personal liberty.

In *Kharak Singh vs State of U.P*[4], while considering the verse of certain police regulations which allowed surveillance, including domiciliary visit, stated that the right to privacy "is an essential ingredient of personal liberty" and that "nothing is more deleterious to man's physical happiness and or than a calculated interference with his privacy,"

In *Govind Singh vs State of M.P*[5] 1975' 3 SCR 946 a right to privacy emanating from the right to personal liberty and the freedom of speech was contemplated.

The 5th and 14th Amendments to the U.S Constitution state that "no person shall be deprived of its life liberty or property, without due process of law" and a right to privacy, or a "right to be let alone" has been interpreted into these provisions for over a century. The concept initially evolved in response to the development of new sophisticated methods of surveillance, like wiretaps etc, akin to right to property. More recently, privacy of a human .personality has also been recognized.

*Griswold vs Connecticut*[6], in 1965, recognized the privacy of the bedroom of married couples" Following this principle, the U.S Supreme Court has held that private consensual acts of sodomy between married couples cannot be criminalized by state statues (Charles O. Cotnery Jerome Henry, 393 US 847 : *Buchatla vs. Bachelor* 4DI US489).

In *Einsenstadt vs Baird*[7], the court held "the Griswold principle protected more than the

4 AIR 1961, SC 1295
5 1975, 3 SCR 946
6 381 (1965) US 479
7 405 (1972) US 438

marital relationship alone. It extended protection to persons who had a significant personal relationship and desired to choose for themselves, free from state pressures, whether or not they wanted to use contraception".

In *Roey Woed*[8], it was held that a Texas abortion law could not prohibit voluntary abortions during the first 3 months of pregnancy, on the basis of a constitutional right to privacy. That right includes the privilege of an individual to plan his own affairs, for outside the areas of plainly harmful conduct, every American is left to sharp is own life as he thinks best, do what he pleases, go where he pleases".

In spite of the recognition of these basic principles of human behaviour, the U.S Supreme Court has displayed singular lack of understanding when it comes to statutes criminalizing sodomy. The constitutionality of these statutes has been challenged several times and has largely been upheld.

Most recently in *Bowers vs Hardwick* (1986)[9], the State of Georgia statue which criminalized sodomy was challenged after a homosexual was charged with committing sodomy on a consenting male adult in the bedroom of his house. The U.S Court of Appeals for the Eleventh Circuit upheld the challenge and put the burden on the state "to provide that it has a compelling interest in regular such behaviour and that the statue was the most narrowly drawn means of achieving that end.

The U.S Supreme Court reversed the judgment with a narrow 5:4 margin. The dissenting judges observed "the concept of privacy embodies the moral fact that a person belongs neither to himself and not others nor to society as a whole".

The question also came before the European Court of Hunan Rights in *Jeffry Dudgeon v Northern Ireland*. Jeffrey Dudgeon, 35 years old and consciously homosexual from the age of 14 lived in Belfast, Northern Ireland. He along with some others had been conducting a campaign aimed at bringing the law in Northern Ireland in line with that in England and wales[10].

On 21 January 1976, the police went to his house, and seized personal papers including diaries and correspondence. He was asked to go to police station where he was questioned for almost 4½ hours about his sexual life. With a view to institute proceedings for gross indecency, the police sent his file to the Director (Public Prosecutions. One year later, in February 1977.

Mr. Dudgeon was informed that charges were not being pressed and his papers returned. W.J.Dudgeon petitioned the European Commission of Human Rights.

The European Court of Hunan Rights held: "the legislation complained of interferes with Dudgeon's right to respect for his private life guaranteed by Article 8.1 (ECOHR) in so far as it prohibits homosexual acts committed in private between consenting males." On whether this breach

---

8 410 US 113

9 760 FZD 1202, 1986

10 European court of Human Rights series A, Volume 45.

was justified, the majority opinion was that it was not.

The fact that the authorities in Northern Ireland had refrained in the past years from prosecuting homosexual acts in private between consenting men over the age of 21 years and capable of valid consent and that no evidence was brought to show this had been injurious to the moral standards in the country was noted by the Court.

The Court accepted that in a democratic society some degree of regulation of male homosexual conduct is necessary, but that the present legislation was totally unjustified and its very existence caused anxiety, suffering and psychological distress to homosexual men.

As a result of this ruling, in October 1982, Northern Ireland issued an order in council bringing the law in line with that in England and Wales.

## 1.9 FREEDOM OF EXPRESSION AND EQUALITY

Article 19, Universal Declaration of Human Rights (UDHR) and Articles 18 and 19, International Covenant on Civil and Political Rights (ICCPR) guarantee the freedom of thought and expression. A right to freedom of speech and expression is recognized in Article 19(1) (a) of the Indian Constitution.

Article 2 UDHR bars "distinction of any kind such as race, colour, sex, language, opinion, national or social origin, property, birth or status." A similar right is recognized in Article 26 ICCPR, and in Articles 14 and 15 of our constitution as interpreted by the Supreme Court.

The Siracusa Principles recognise certain limitations, which can be put in the rights in the ICCPR, but also state in the "General Interpretative principles Relating to the Justification of Limitation".

Any assessment of the necessity of a limitation shall be made on objective considerations".
"(12) "The burden of justifying a limitation upon a right guaranteed by the Covenant lies with the state."

Attention must also be drawn to the fact that even in times of public emergency, the ICCPR prescribes in Article 4.1 that a derogation of the obligation is not allowed if involving "discrimination solely on the ground of race, colour, sex, language, religion or social origin." It is clear that the right against discrimination is not to be violated even in the most desperate times.

In the U.K., inspite of the 1967 amendment to the criminal law, serious onslaughts on the rights of gay men and lesbians continue. In 1986, the British government enacted Clause 28 banning the "promotion of homosexuality (as a) pretended family relationship."

Clause 25 of the Criminal Justice Bill, still under debate in the U.K., includes provisions for higher sentences for soliciting, procuring and indecency by gay men. The Children's Bill, 1991 seeks to ban lesbians and gay men from fostering children. Clearly, merely to decriminalize is not the end

of the problem.

In India, the very existence of homosexuality is denied, and those who are 'found out' face severe ostracism and summary dismissal from their jobs. When Lila Srivastava & Urmila Namdeo decided to cement their long-standing friendship with marriage, they were dismissed from the police service without issuing a show cause notice. Though the authorities freely vocalized their fear for "discipline" in the ranks, on paper the reason for dismissal was “absence without leave.”

### 1.10 SOCIAL NORMS

Homosexuality has been treated in various ways by society. A sin against god, a heresy which can only be absolved by fire, a sexual deviance which must be given deterrent punishment, a mental aberration that must be treated.

However, evidence is piling up that homosexuality is neither a disease nor a crime, but is inherent to human nature. 111(" Kinsey reports on male and female sexual behaviour (1948 and 1953) concluded that homosexual behaviour was neither unnatural, abnormal nor neurotic, but that it represented as "inherent physiologic capacity", and is found "in every age group, in every social level, in every conceivable occupation, in cities and on farms, and in the most remote areas."

To quote just one instance, a report from the Indiana Institute for Sex Research (Bell, Weinberg and Hammersmith, 1991) based on exhaustive questioning of persons of contrasting sexual orientation found that "there is no reason to think it would be an easier for homosexual men and women to reverse their sexual orientation than it would be for heterosexual (persons) to become predominantly or exclusively homosexual"

### CONLUSION:

Homosexuality is not a mental disease. It is as natural as heterosexual. The human cannot control on it. In India the LGBT community face harassment, violence. It is very necessary to make people aware of the presence of LGBT community. The Government of India should wipe away its conservative nature and take concrete steps for the welfare of sexual minority. The supreme court’s verdict on Decriminalization of section 377 was a significant landmark for the LGBT community. finally, we can say that, the judgment by the Hon’ble Supreme Court was given within the favor of the LGBT community it should work effectively both on paper and in practicality.

Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# व्याकरणशास्त्रे ईश्वरचन्द्र-विद्यासागरस्य योगदानम्

Pradip Sing
Research Scholar, Department of Vyakarana
National Sanskrit University,Tirupati, Andhra Pradesh, India

**सारांशः**–विश्वस्य प्राचीनतमास्वखिलासु भाषासु संस्कृतं सर्वस्यापि अतिशेते इत्यत्र न कस्यापि वैमत्यम्। वस्तुतोऽस्यवैशिष्टस्य हेतुषु अस्याः व्याकरणं प्रामुख्यं भजते, येनाद्यापीयं भाषाऽक्षुण्णरूपेण विराजमाना सर्वान् भारतीयान् वैदेशिकान् अपि च सम्मोहयति।ब्राह्मणेन निष्कारेण धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं हि षडङ्गेषु व्याकरणम्, प्रधाने हि कृतो यत्नः फलवान् भवति इति वचनेन व्याकरणमेव वेदस्य प्रधानाङ्गं फलितम्।व्याकरणशास्त्रे पाणिनीयव्याकरणं सर्वातिशायि विश्वप्रसिद्धः वर्तते। पाणिनीयव्याकरणस्य सहजबोधार्थं प्रक्रियामार्गे अनेकाः वैयाकरणाः व्याकरणग्रन्थं विरचितवन्तः। तेषु मुख्यं भवति भट्टोजिदीक्षितेन विरचितः वैयाकरणसिद्धान्तकौमुदी इति नामकः ग्रन्थः। प्रक्रियामार्गैव बङ्गप्रदेशे संस्कृतानुरागी सर्वेषां सहजरूपेण व्याकरणं शिक्षार्थं बङ्गनवजागरणस्य प्रातःस्मरणीयः मनीषी पण्डितः ईश्वरचन्द्र–विद्यासागरः महोदयः पाणिनिव्याकरणम् आधारीकृत्य ग्रन्थद्वयं विरचितम्। अतः संस्कृतव्याकरणशास्त्रे ईश्वरचन्द्र–विद्यासागरस्य योगदानम् इति विषयमाधारीकृत्य मया लेखेऽस्मिन्विचारः विहितः।

**विशेषशब्दाः-** विद्यासागरस्य परिचयकार्यकालकृतयश्च, व्याकरणशास्त्रे योगदानम्, संस्कृत व्याकरणस्य उपक्रमणिका, समग्र व्याकरणकौमुदी इत्यादयः।

**शब्दाः-** विद्यासागरस्य परिचयकार्यकालकृतयश्च, व्याकरणशास्त्रे योगदानम्, संस्कृत व्याकरणस्य उपक्रमणिका, समग्र व्याकरणकौमुदी इत्यादयः।

'व्याकरणं' वेदपुरुषस्य मुख्यत्वेन स्वीक्रियते। वि आङ् इत्युपसर्गद्वयपूर्वकात् 'डु कृञ् करणे'[1]इति धातोः 'करणाधिकरणयोश्च[2]' इति सूत्रेण ल्युटि अनादेशे गुणे च व्याकरणम् इति सिद्ध्यति। 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्[3]' – इत्यपि उच्यते। अर्थात् व्याकरणेन साधुशब्दज्ञानं भाषाशुद्धिः च जायते। व्याकरणस्यापरं नाम शब्दशास्त्रमपि वर्तते।व्याकरणस्य मुख्यः सम्बन्धः पदैरेव, न तु वाक्यैर्न वा वर्णैः, अतः व्याकरणं

1 . धा.पा. तनादिगणः, धातुः 10

2 . अष्टा. 3–3–117

3. महाभाष्यम् पस्पशाह्निकम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पदशास्त्रमप्युच्यते।व्याकरणशास्त्रं नितान्तं प्राचीनं वर्तते। रामायणे सर्वप्रथमं यदा रामेण सह हनुमतः सङ्गमोऽभवत्, तदा हनुमद्वाक्यशुद्धिं वीक्ष्य भगवान् श्रीरामो लक्ष्मणं प्रत्याह –

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।।**[4]

महाभारतस्योद्योगपर्वणि त्रेतायुगे महर्षिव्यासेन निर्दिष्टं यत् –

**सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।**

**तन्मूलती व्याकरणं व्याकरोतीति तत्तथा।।**[5]

व्याकरणं वेदस्य मुख्य स्थानीयं मतं –'मुखं व्याकरणं स्मृतम्'[6] इति। वेदेङ्गानि च षडाहु व्याकरणम् –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[7]

व्याकरणशास्त्रस्य साधुज्ञानं विना वेद, वेदाङ्ग, स्मृति, पुराण, काव्यादिषु शास्त्रेषु शास्त्रान्तरेषु वा सुगमतया प्रवेशो दुर्लभः, यस्य कस्यापि शास्त्रस्य, शास्त्रान्तरस्य वा अध्ययनं क्रियते न वा व्याकरणशास्त्रस्याध्ययनमवश्यकर्तव्यतया करणीयम्। व्याकरणं योऽधीते, स शास्त्राण्यधिगन्त्यं समर्थो भवतीति। अतः व्याकरणस्य विषये एवम् उच्यते –

**यद्यपि बहुनाधीषे, तथापि पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।**[8]

व्याकरणशास्त्रे पाणिनीयव्याकरणं सर्वातिशायि विश्वप्रसिद्धः वर्तते। अस्य ग्रन्थस्य वैज्ञानिकतां दृष्ट्वा विद्वांसः पाणिनिं महासङ्गणकः (Super Computer)इत्याख्यया विभूषयन्ति। अतः उक्तमस्ति –

**पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।**

---

[4]. रामा. 4-3-29

[5]. म.भा. उ.प. 42 - 60

[6]पाणिनीयशिक्षाः

[7]पाणिनीयशिक्षाः 41-42

[8] . सु.भा.प्रकरणमं वेकरणाप्रशंसा,श्लो.सं. 12

पाणिनीयव्याकरणे अष्ठाध्यायीनामकग्रन्थे प्रायः चतुस्सहस्रसूत्राणि वर्तन्ते, तत्र षड्विधानि विभक्तानि सूत्राणि सन्ति तानि च –

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्र लक्षणम्।।**[9]

अस्य पाणिनीयव्याकरणस्य त्रिमुनिव्याकरणम् इति नामान्तरम् अस्ति –

**वाक्यकारं वररुचिं भाष्याकारं पतञ्जलिम्।**

**पाणिने सूत्रकारञ्च प्रणितोऽस्मि मुनित्रयम्।।**

पाणिनीयव्याकरणस्य सहजबोधार्थं, लोकप्रियकरणार्थञ्च नैकाः वैयाकरणाः अष्टाध्यायी इति ग्रन्थस्य सूत्राणां पूनर्व्याख्यानं कृतवन्तः। प्रक्रियापरम्परायां त्रिमुनि व्याकरणम् आधारीकृत्य बहवः वैयाकरणाः व्याकरणग्रन्थं विरचितवन्तः। तेषु मुख्यं भवतिभट्टोजिदीक्षितेन विरचितः वैयाकरणसिद्धान्तकौमुदी इति नामकः ग्रन्थः। समग्रभारतवर्षे तस्य ग्रन्थस्य पठनपाठनरवः प्रसिद्धः मुख्यरूपेण श्रूयते। सर्वेषां सूत्राणां समावेशनं, प्रक्रियारूपेण सन्निवेशनमस्याः सिद्धान्तकौमुद्याः वैशिष्ट्यम्।

वैदिकभाषानुशीलनं भित्तिमादाय अतिप्राचीनकालात् भारतवर्षे व्याकरणचर्चायाः शुभारम्भो भवति। बङ्गप्रदेशे अञ्चलविशेषे पाणिनीयः व्याकरणस्य विस्तृतिः अध्ययनम् अध्यापना च अव्याहतस्थितेऽपि साधारणभावेन पाणिनीयसूत्रस्य संक्षिप्तरूपान्तरं देशेऽस्मिन् जनप्रियमासीत्। प्राचीनबङ्गे सर्वाग्रे येषां संक्षेपितव्याकरणानां नामानि प्राप्तानि तेषु सर्वाग्रे मैत्रेयरक्षितस्य नामोल्लेखयोग्यम्। मैत्रेयरक्षितस्य विरचितं धातुप्रदीपः, दुर्घटवृत्तिः, पुरूषोत्तमदेवस्य भाषावृत्तिः, परिभाषावृत्तिः, कारकचक्रः, शर्ववर्माविरचितं कातन्त्रव्याकरणं, वोपदेवस्य मुग्धवोधव्याकरणं, त्रयोदशशतके क्रमदीश्वरस्य संक्षिप्तसारव्याकरणं, पद्मनाभदत्तस्य सुपद्मव्याकरणं, काशीनाथविद्यानिवासस्य शिशुबोधव्याकरणं, परमानन्दसेनस्य चैतन्यामृतव्याकरणं नामकः पाणिने सारसंक्षेपः उल्लेखयोग्यं प्रचलितञ्च। कातन्त्रः वा कलापव्याकरणं पूर्वबङ्गे, मुग्धबोधव्याकरणं पश्चिमबङ्गप्रदेशे विशेषजनप्रियमासीत्। मध्ययुगेबङ्गप्रदेशे व्याकरणचर्चा[10] इत्युक्ते प्रधानतः अस्य समूहस्य व्याकरणस्य टीकाभाष्यं मूलमासीत्। आधुनिककाले ऊनविंशशतके भरतसेनविरचितं द्रूतबोधव्याकरणं, तारानाथतर्कवाचस्पतेः आशुबोधव्याकरणं, परम्परायामेव बङ्गनवजागरणस्य प्रातः स्मरणीय–पण्डित–ईश्वरचन्द्र–विद्यासागर[11]–विरचितं'संस्कृत व्याकरणोपक्रमणिका''समग्र व्याकरणकौमुदी' इत्यादिश्च ग्रन्थानां मध्ये विद्यासागर–विरचितं ग्रन्थद्वयम् अव्याहतभावेन बङ्गोत्तरप्रदेशेऽपि प्रचलति[12]।

---

[9]लघु सिद्धान्तकौमुदी

[10]. सं.सा.वा.दा.

[11]. अ.अ.वि.

[12]. वा.भा.व्या.क्र.

- **ईश्वरचन्द्र-विद्यासागरस्यपरिचयकार्यकालकृतयश्च**

भारतराष्ट्रस्य पूर्वभागः बङ्गप्रदेशः इत्युक्ते अधुना पश्चिमबङ्गराज्ये मेदिनीपुरमण्डलस्य वीरसिंह नाम इति ग्रामे सेप्टेम्बरमासस्य षड्विंशतितमदिवसे 1820 ख्रीष्टाब्दे एकस्मिन् दरिद्रब्राह्मणकुले ईश्वरचन्द्रवन्दोपाध्यायः जन्म लब्धवान्। पितुः नाम ठाकुरदास वन्दोपाध्यायः माता च भगवतीदेवी। पञ्चमे वत्सरे ईश्वरचन्द्रस्य विद्यारम्भः ग्राम्यपाठशालायाम् अभवत्। ग्राम्यपाठशालापाठं समाप्य, स नवमेवर्षे वयसि पिता ठाकुरदासवन्दोपाध्यायेन सह कलिकाताम् आगत्य 1829 ख्रीष्टाब्दे ईश्वरचन्द्रः अध्ययनार्थं संस्कृतमहाविद्यालये प्राविशत्। प्रवेशानन्तरं संस्कृतभाषा तथा संस्कृतशास्त्रविषये अध्ययनं कृतवान्। पञ्चमासाधिकद्वादशवत्सरं यावत् व्याकरणं, साहित्यम्, अलङ्कारशास्त्रं, वेदान्तशास्त्रं, न्यायशास्त्रं, ज्योतिषशास्त्रं स्मृतिशास्त्रम् इत्यादि विषये ज्ञानलाभं कृतवान्। तत्र परिश्रमेन मेधावलेन प्रतिवर्षं महाविद्यालये उन्नतस्थानमधिकृत्य ईश्वरचन्द्रः संस्कृतमहाविद्यालयस्य अन्तिमपरीक्षायमुत्तीर्य पाठं समाप्य द्वाविंशतिवयसि अर्थात् 1841 ख्रीष्टाब्दे संस्कृतमहाविद्यालयः कर्तृपक्षः तेषां कृते 'विद्यासागरः' इत्युपाधिं प्रशंसापत्रं च प्रदत्तवान्[13]। विद्यासागरमहोदयस्यप्रथमोद्योगः 1841 ख्रीष्टाब्दे फोर्ट-उयलियाम्-महाविद्यालये अध्यापकरूपेण, अनन्तरं 1850 तमे वर्षे संस्कृतमहाविद्यालयस्य साहित्यविषये अध्यापकः सञ्जातः, 1851 तमे वर्षे अध्यक्षपदं लब्धवान्। भारतभूमौ लब्धजन्मेषु सर्वेषु महापुरूषेषु ईश्वरचन्द्र-विद्यासागरः, यस्य पूर्वसंज्ञा आसीत् ईश्वरचन्द्रवन्दोपाध्यायः यश्च युगपुरुषरूपेण स्मर्यते। महापुरुषोऽयम् आधुनिककालस्य महान् पण्डितः, शिक्षाविद्, स्मृतिशास्त्रमर्मज्ञः, दार्शनिकः, मानवतावादी, समाजसंस्कारश्च आसीत्। बङ्गप्रदेशे बङ्गगद्यभाषायाः समृद्ध्यर्थं, संस्कृतभाषा संस्कृतसाहित्यञ्च विकाशे, संस्कृतव्याकरणशिक्षणविकाशे ईश्वरचन्द्र-विद्यासागरस्य योगदानं परिलक्ष्यते।

ईश्वरचन्द्र-विद्यासागरमहोदयेनसंस्कृतसाहित्ये सप्तदश, आङ्गल् भाषायां पञ्च, बङ्गभाषायां त्रिंशत् मिलित्वा द्वापञ्चाशत् पुस्तकानि विरचितानि। तेषां मध्ये संस्कृतव्याकरणविषये ग्रन्थद्वयमेव रचितम् - i) संस्कृत व्याकरणोपक्रमणिका,ii) समग्र व्याकरणकौमुदी।

- **व्याकरणशास्त्रे ईश्वरचन्द्र-विद्यासागरस्य योगदानम्**

प्राचीनयुगमध्ययुगयोर्मध्ये बङ्गप्रदेशे पाणिनीयव्याकरणस्य चर्चाविषये प्रमाणं बङ्गीयविरचितम् अष्टाध्यायीक्रमानुसारि संस्कृतव्याकरणं तस्य टीका भाष्यादिः[14]।

अपाणिनीयव्याकरणसम्प्रदायसङ्कुले बङ्गप्रदेशे झटिति पाणिनीयव्याकरण-सम्प्रदायस्य विकाशं भवितुं नार्हति। परन्तु भारतवर्षस्य इतरप्रान्तेषु सर्वत्र पाणिनीयपरम्परा व्याकरणस्य चर्चा वर्धमाना। तेन बङ्गप्रदेशस्य

---

13. मा,र,ई.वि. - पृ. 27

14 . सं.सा.वा.दा. - पृ. 238

संस्कृतचर्चायाः संयोगसाधने पाणिनीयपरम्परा उपयोगी भवेत् इति विचिन्त्य ये विद्वांसः वैयाकरणाः आजीवनं कृतप्रयत्नाः आसन् तेषु प्रातःस्मरणीयः मनीषी पण्डित ईश्वरचन्द्रविद्यासागरस्य योगदानम् उल्लेखयोग्यम्।

ऊनविंशशतकब्द्याम् अस्माकं भारतवर्षराष्ट्रस्य पूर्वभागः बङ्गप्रदेशः इत्युक्ते अधुना पश्चिमवङ्गः इति प्रदेशे व्याकरणस्य चर्चायाः बहुनां व्याकरणग्रन्थानां पठनपाठनं प्रचलितमासीत्। पाणिनीयव्याकरणस्य प्रसारः बङ्गप्रदेशे सर्वत्र तादृशः नासीत्। तस्मिन् समये आचार्यः ईश्वरचन्द्र-विद्यासागरः महोदयः पाणिनीयपरम्परायाः प्रसारे अन्यतमः पथिकृतः आसीत्। व्याकरणस्य प्रयोजनं शास्त्राध्यायने न केनापि शक्यम् अस्वीकृतञ्च। परन्तु महती पाणिनीय परम्परा वालानां सुखबोधाय अन्तरायभूता। इदानीं पाणिनीय परम्परा इतरव्याकरणापेक्षया काठिण्यं तं त्यक्त्वा इति न समीचीनम्। तस्मात् एव कारणात् पाणिनीयसिद्धान्तमनुसृत्यबङ्गप्रदेशस्य संस्कृतशिक्षार्थीनां, वालानां सहजभावेन अनायासेन संस्कृतव्याकरणविषयस्यशिक्षणं लाभार्थं ग्रन्थद्वयं विरचितम्। तद्यथा - 1. **'संस्कृत व्याकरणस्य उपक्रमणिका'(1851)** 2. **'समग्र व्याकरणकौमुदी' (1853)**।

ग्रन्थद्वये प्रतिपाद्यविषये समैक्यतापरिलक्ष्यते। संस्कृत व्याकरणस्य उपक्रमणिकायां ये विषयाः वीजरूपेण, सूक्ष्मरूपेण, सूत्रविहीन-व्याख्यारूपेण अधिकाः लौकिकाः उदाहरणेन सन्ति, तेषामेव विषयानां वृक्षरुपेण, स्थूलरूपेण, सूत्रसहितव्याख्यारूपेणैव समग्रव्याकरणकौमुदीग्रन्थे विवृयते। ग्रन्थद्वयस्य लेखनशैली एवं वर्तते यत् - आगमनविधिः निगमनविधेयश्च। आगमनविधिः अर्थात् उदाहरणपूर्विका व्याख्या। निगमनविधेयश्च प्रयोगः व्याकरणकौमुद्यां परिभाषा, कारक-विभक्तिनिर्णयः, तद्धितप्रत्ययः, स्त्रीप्रत्ययः, समासनिर्णयः विषये उपस्थाप्यते।

- **संस्कृतव्याकरणस्यउपक्रणिका -**

नव्यव्याकरणस्य कौमुदी परम्परा नवीनविद्यार्थिनः सूत्रवृत्ति उदाहरणादिनां कण्ठस्थीकरणेन संस्कृतभाषाज्ञानस्य लक्ष्यस्थलं न प्राप्नुवन्ति। तस्मात् एव कारणात् अस्मिन् ग्रन्थे सूत्रवृत्तिणां समावेशः तेन न कृतः।

विद्यार्थेषु संस्कृतव्याकरणस्य प्राथमिकज्ञानं सम्पादयितुम् एव 'संस्कृत व्याकरणस्य उपक्रमणिका' इति ग्रन्थस्य निर्माणं कृतवान्।

किमर्थं पाणिनीय सूत्रपरम्परां विहाय आचार्येन उपक्रणिका विरचिता इति चेत् उच्यते यद्, तदानीं वैदेशिकाः अपि प्राच्यज्ञानं सम्पादयितुं संस्कृतशिक्षायाः अनुरक्ता आसन्। तेषां कृते सुलभतया संस्कृतभाषाज्ञानम् उद्पादयितुं पण्डिताः बहुनां संस्कृतव्याकरणग्रन्थानां संरचनं कृतवान्। तेषु ग्रन्थेषु सूत्रभाष्यवर्जिता सहज-सरल-व्यवहारिकः उदाहरणेन व्याख्यारूपेन इयम् उपक्रमणिकाविशिष्टं स्थानं लभ्यते।

अस्मिन् उपक्रमणिकाग्रन्थे प्रकरणानुसारेण व्याकरणस्य विषयाः वर्णिताः सन्ति। तत्र आदौ वर्णनिर्णयः, वर्णस्योच्चारणस्थानम्। तदन्तरं सन्धिप्रकरणं, णत्वविधानं, षत्वविधानं, सुवन्तप्रकरणं, विभक्तिस्याकृतिः स्वरान्तव्यञ्जणान्तशब्दानां रूपंलिङ्गत्रये। सर्वनामशब्दः, संख्यावाचकशब्दः, अव्ययशब्दः, स्त्रीलिङ्गप्रत्ययः, कारकः, अर्थविशेष-शब्दविशेषयोगे विभक्तिनिर्णयः, विशेष्य-विशेषणम्, तिङन्तप्रकरणम्, अकर्मकक्रिया, सकर्मकक्रिया, धातुरूपः, कर्तृवाच्यं, कर्मवाच्यं, भाववाच्यं, कृदन्तशब्दः, समासः, तद्धितप्रत्ययःइत्यादयः विषयाः सुलभतया वर्णिताः। अस्य ग्रन्थस्य अध्ययनेन सामान्यमतिवालकाः अनायासेन प्राथमिक संस्कृत ज्ञानं सम्पादयितुम्

अर्हन्ति। तस्मात् बङ्गप्रदेशे संस्कृतशिक्षा प्रसाराय तथा वैदेशिकानाम् अपि संस्कृतानुरागजनने अस्य ग्रन्थस्य महत् अवदानम् अनस्वीकार्यम्।

- **समग्रव्याकरणकौमुदी -**

प्राचीन वैयाकरणानां माहेश्वर-सूत्र-रूपवर्ण-स्थापनपद्धतिं विहाय सूत्ररचना अस्य ग्रन्थस्य मुख्यं वैशिष्ट्यम्। माहेश्वरसूत्राणि वस्तुतः प्रत्याहारनिर्माणे बेतुभूतानि पाणिनिना विरचितानि बहुनि सूत्राणि प्रत्याहारमूलकानि यथा - '**अकः सवर्णे दीर्घः**[15]'**इको यणचि**[16]' इत्यादिषु सूत्रेषु प्रत्याहाराः एव मुख्याः। इदानीम् आचार्य-विद्यासागर-प्रणीते "समग्र व्याकरणकौमुदी" इत्याख्ये ग्रन्थे माहेश्वरसूत्राणि न स्थापितानि। तस्माद् अस्मिन् ग्रन्थे प्रत्याहारस्य  अपेक्षा नास्ति। परन्तु छात्राणां सुलभबोधाय आचार्येन पाणिनि-सूत्राणि एव भिन्नतया पुनः स्थापितानि। अत्र किमर्थम् एवं प्रत्याहारवर्जनेन पाणिनीय-सूत्राणाम् अर्थं स्वीकृत्य सुलभभाषायाः पुनः सूत्राणि भाषितानि तस्मिन् विषये कारणद्वयं परिलक्ष्यते।

प्रथमतः मन्दमति छात्राणाम् आशुबोधाय माहेश्वरसूत्रतत्वानि क्लेशकरं भवितुमर्हति इति विचिन्त्य विद्यासागर-महाभागेन एवं प्रकारेण प्रयत्नः विहितः।

द्वितीयतः आचार्यः विद्यासागरः महोदयः मूलतः पाणिनिव्याकरणस्य सूत्राणि सरलानि कर्तुं प्रयत्नं कृतवान्। दीर्घकारसूत्रस्य स्वल्पाकारं, बहुनां सूत्राणां समाहाररूपेण एकसूत्रम्, गूढस्वल्पकायसूत्राणां झटिति प्रतीत्यर्थं रूपान्तरितं नवरूपेण वा निर्मितम्। न केवलं पूर्वाचार्याणां सूत्राणामपि तु अनुक्तस्थाने स्वसूत्रमपि विरचितम्। बहुषु सूत्रेषु तस्य स्वातन्त्रता वर्तते।

आचार्यस्यईश्वरचन्द्रविद्यासागरस्य विशेषावदानमिदमस्ति यत् सः संस्कृतव्याकरणशिक्षार्थं सरलोपायेन "व्याकरणकौमुदी" इति ग्रन्थं विरचितवान्। ग्रन्थेऽस्मिन् भागचतुष्टयं परिलक्ष्यते।

प्रथमभागे प्रतिपाद्यविषयाः - 1. वर्णनिर्णयः, 2. परिभाषा, 3. सन्धिनिर्णयः, 4. णत्वविधान-षत्वविधानम्, विशेष्य-विशेषणम्, 5. सुबन्तप्रकरणम्, 6. सर्वनाम्नशब्दः, संख्यावाचकशब्दः, 7. अव्ययम् इत्यादयः।

द्वितीयभागे प्रतिपाद्यविषयाः- तिङन्तप्रकरणे -विभक्तिस्याकृतिः, धातुविभागः,  साधारणनियमः,तुदादि - भ्वादि - दिवादि - स्वादि - तनादि - क्र्यादि - रुधादिगणीयः धातुनां विषये प्रतिपादितम्।

तृतीयभागे प्रतिपाद्यविषयाः - 1. अदादि - ह्वादिगणौ 2. प्रत्ययान्त - णिजन्त - सन्नन्त - यङ्लुगन्त - नामधातुनां, परस्मैपद, आत्मनेपद विधानम्, कर्म्मवाच्य - भाववाच्य - कर्म्मकर्त्तृवाच्य प्रकरणम्, लकारार्थ निर्णयः 3. कृत्प्रकरणम् इत्यादयः।

चतुर्थभागे प्रतिपाद्यविषयाः 1. कारकविभक्तिः 2. तद्धितप्रत्ययः 3. स्त्री-प्रत्ययः 4. समासनिर्णयः इत्यादयः।

---

15 . अष्टा. 6-1-101

16 . अष्टा. 6-1-77

प्रथम–द्वितीय–तृतीयभागत्रये संस्कृतव्याकरणस्य परिभाषाप्रकरणं विहाय व्याख्यारूपेण सहजसरल: व्यावहारिक: अनेक:लौकिक: उदाहरणेन विषयाणां स्वरूपम् आलोचितमस्ति।चतुर्थभागे कारकप्रकणम्, तद्धितप्रकरणम्, स्त्रीप्रत्ययप्रकरणम्, समासप्रकरणमिति प्रकरणानां सूत्रात्मकालोचनं विद्यते। व्याकरणकौमुद्यां 851 सूत्राणि सन्ति। तेषु 167 सूत्राणि पाणिने:, कात्यायनस्य 18 वार्तिकानि एवं च 666 सूत्राणि विद्यासागरेण नवरूपेण निर्मितानि पाणिनिसूत्रम् आधारीकृत्य। एतेषु परिभाषाप्रकरणे 27 सूत्राणि, कारकविभक्तिप्रकरणे 123 सूत्राणि, तद्धितप्रत्यप्रकरणे 319 सूत्राणि, स्त्रीप्रत्ययप्रकरणे 64 सूत्राणि, समासप्रकरणे 318 सूत्राणि विद्यन्ते।

- **व्याकरणकौमुदीग्रन्थे प्रथमभागस्य प्रतिपाद्यविषय: -**

**वर्णनिर्णय:**- वर्णविषये ईश्वरचन्द्रमहाभागेन उच्यते यत् – अ इ उ, क् ख् ग् एतेषां प्रत्येकं वर्ण: इत्युच्यते। स च द्विविध: स्वरवर्णव्यञ्जनवर्णश्चेति।

**स्वरवर्ण:** -अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ इति त्रयोदशवर्णा: स्वरवर्ण: इत्युच्यते। एतेषु अ इ उ ऋ ऌइति पञ्चवर्णाह्रस्वस्वरयुता:, अन्ये दीर्घस्वरयुता: भवन्ति। ऌकारस्य दीर्घ: नास्ति।

**व्यञ्जनवर्ण:** - क् ख् ग् घ् ङ् च् छ् ज् झ् ञ्, ट् ठ् ड् ढ् ण्, त् थ् द् ध् न्, प् फ् ब् भ् म्, य् र् ल् व् श्, ष् स् ह्: इति पञ्चत्रिंशत् वर्णा: व्यञ्जनवर्ण: इति निगदिता:, तन्मध्ये ककारादारभ्य मकारपर्यन्तम् एते पञ्चत्रिंशतिवर्णा: स्पर्शवर्ण: इत्युच्यते। क् ख् ग् घ् ङ् इति कवर्ग:, क्रमश: पञ्चपञ्चा: चवर्ग:, टवर्ग:, तवर्ग:, पवर्ग: रूपेण ज्ञायते। य् व् र् ल् एतेषां चर्तुणाम् अन्त:स्थवर्णाख्यम्। श् ष् स् ह् एतेषां वर्णानाम् उष्मवर्ण:, अनुस्वार: विसर्गस्य च विद्यासागरप्रणीतव्याकरणग्रन्थे अयोगवाहवर्णरूपेण गृह्यते।

**वर्णस्य उच्चारणस्थानानि**–वर्णानाम् उच्चारणस्थानविषये सर्वेषु व्याकरणग्रन्थेषु अयं विषय: चर्चित:। नायं ग्रन्थ: व्यतिक्रम:। पाणिनीयव्याकरणानुसारेण इदं ग्रन्थे वर्णानाम् उच्चारणविषय: उपस्थाप्यते।

**सन्धिप्रकरणम् –** वर्णद्वयस्य परस्परमेलनमेव सन्धि:[17] इत्युच्यते। व्याकरणकौमुद्यां स्वरसन्धि:, व्यञ्जनसन्धि:, अपि च विसर्गसन्धि: इति त्रिधा विभक्त:। यत्र स्वरवर्णेन सह स्वरवर्णस्य सन्धि: स स्वरसन्धि:, व्यञ्जनेन सह स्वर: व्यञ्जनमिति व्यञ्जनसन्धि:। विसर्गेण सह स्वर: व्यञ्जनमिति विसर्गसन्धि: इत्युच्यते।

**स्वरसन्धि:** -i) यदि अकाराद्वा आकाराद्वा परम् अकार: आकार: भवति तर्हि मिलित्वा आकार: भवति तच्च पूर्ववर्णेन सह भवति[18]। यथा – शश+अङ्क: = शशाङ्क:, दया+अर्णव:=दयार्णव: इत्यादयश्च।

**व्यञ्जनसन्धि:** -i) यदि तकारस्य अथवा दकारस्य स्थाने यदि चकार: अथवा छकार: भवति तर्हि तयो: स्थाने चकार: भवति[19]। यथा – भवत्+चरणम्=भवच्चरणम्, तद्+छवि: = तच्छवि: इत्यादय:।

---

[17]. पर: सन्निकर्ष: संहिता 1–4–109

[18]. अक: सवर्णे दीर्घ: 6–1–101

[19]. स्तो: श्चुना श्चु: 8–4–40

**णत्वविधानम् -** णत्वविधानमित्युक्ते नकारस्य स्थाने णकारविधानं, पाणिनीयव्याकरणे णत्वविधानार्थं बहुनि सूत्राणि सन्ति। तदनुकरणेनैव एते त्रयविंशति क्रमानुक्रमेन णत्वविधानं निर्णयविषये प्रतिपादितम्। ते नियमा:-

i) ऋ, ॠ, र, ष इत्येतेभ्य: चतुर्भ्य: परं नकारस्य णकार: भवति[20]। यथा - भ्रातृ+ नाम् = भ्रातृणाम्।

**षत्वविधानम् -** षत्वविधानमित्युक्ते सकारस्य स्थाने षकारादेश:। षत्वविधानविषये पाणिनीयव्याकरणे बहुनि सूत्राणि सन्ति।तदनुकरणेनैव एते चर्तुविंशति क्रमानुक्रमेन षत्वविधानं निर्णयविषये प्रतिपादितम्। ते नियमा: -

i) अकार:, आकार: भिन्न: स्वरवर्ण:, एवं ककार: रकार: इत्येतेभ्य: वर्णेभ्य: परं प्रत्ययस्य सकारस्य षकारादेश: भवति[21]। यथा - नदी+सु = नदीषु।

**सुवन्तप्रकरणम् -** प्रातिपदिकात्परं सप्तविभक्तय:, विभक्तियुक्तशब्दस्य सुबन्तमपि च पदसंज्ञा भवति। प्रत्येकस्मिन् विभक्तौ वचनत्रयं भवति। अत्रादौ स्वरान्त-पुलिङ्गशब्दानां उदाहरणं दृश्यते। तद्वत्स्त्रीलिङ्गशब्दानामपि नपुसकलिङ्गशब्दानां च रूपाणि सन्ति। तत:परं व्यञ्जनान्तशब्दानां रूपाणि, सर्वनामशब्दानां रूपाणि, संख्यावाचकशब्दानां रूपाणि सन्ति।

**अव्ययशब्द:** –येषां शब्दानामुत्तरे विभक्ति: नास्ति, तस्य परिवर्तनमपि नास्ति कदापि, तेषाम् अन्ते स्थितस्य रकारसकारयो: विसर्जनीयस्स्यात्। एते शब्दा: अव्ययसंज्ञका:। सिद्धान्तकौमुद्यां अयमेव विषय: प्रोक्त: -

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**

**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्[22]।।**

क्रियायोगे विंशत्यव्यया: उपसर्गसंज्ञा: स्यु:। **गतिश्च**[23] इति सूत्रेण पाणिनीयव्याकरणे प्रतिपादितं वर्तते। सिद्धान्तकौमुद्यां यथा निस् दुस् इत्यनयोरपि उपसर्गसंज्ञा: स्यु: व्याकरणकौमुद्यां तथा न स्वीकृतम्।

- **व्याकरणकौमुदीग्रन्थे द्वितीय-तृतीयभागस्य प्रतिपाद्यविषय: -**

**तिङन्तप्रकणम्** - क्रियावाचकप्रकृति: अर्थात् मूलशब्द: धातु: भवति[24]। यथा - भू, गम्, दृश् इत्यादय:। धातो: परं दशविभक्ति: भवति। यथा - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्ल-कारा:इत्यादय:। प्रत्येकस्मिन् विभक्तौ वचनत्रयं, प्रथमपुरुष-मध्यमपुरुष-उत्तमपुरुषे दशगणादिक्रमे व्यवहारिकानां धातुनां रूपाणि स्थापितानि।

---

[20]. रषाभ्यां नो ण: समानपदे 8-4-1

[21]. इण्को: 8-3-57। आदेशप्रत्ययो: 8-3-59।

[22]. सि.कौ. पृ. 67

[23]. अष्टा. 1-4-60

[24]. भूवादयो: धातव: 1-3-1

**कृत्यप्रकरणम्** – धातोः परं तव्यत्, निष्टा, तुमुन् प्रभृतीनां प्रत्ययानां कृत्यप्रत्ययरूपेण अभिहितम्। कृत्यप्रत्ययः बहुविधः भवति। कृत्यप्रत्ययः क्रियायाः मतं प्रकाशितं भवति। व्याकरणकौमुद्यां प्रत्येकप्रत्ययस्य व्यवहारः नियमसहयोगेन अधिकोदाहरणेन विषयोपस्थाप्यते।

एवं रूपेण उपक्रमणिकाग्रन्थात् व्याकरणकौमुदीग्रन्थे पाणिनीयसूत्रस्य सहज–सरल–व्याख्यासहयोगेन अधिकोदाहरणेन भागत्रयस्य वर्णितविषयस्य विषयः विद्यते।

- **व्याकरणकौमुदीग्रन्थे चतुर्थभागस्य प्रतिपाद्यविषयः –**

**कारकविभक्तिनिर्णयः**– कारकविभक्तिनिर्णयविषये प्रथमो भवति विभक्तिरिति तदनन्तरं कारकविषये ग्रन्थे आलोचितम्। आचार्येणव्याकरणकौमुद्यां विभक्तिविधायकं सूत्रं प्रणीतम् – **'संख्याकारकादिबोधयित्री विभक्ति'**[25]रिति। यथा – घटः घटौ घटाः इति।अत्रः घटः इत्युक्ते एकत्वसंख्याविशिष्टः घटः, घटौ इत्युक्ते द्वित्वसंख्याघटः, घटाः इत्युक्ते बहुत्वसंख्याविशिष्टः घटः इति। विभक्तयः सप्त इति। कुत्र का विभक्तिः तदग्रे क्रमशः आलोच्यते।

**विभक्तिनिर्णये** व्याकरणकौमुद्यां सप्तसप्ततिः सूत्राणि परिलक्ष्यन्ते तन्मध्ये **'अभिधेयमात्रेप्रथमा[26]'** इति सूत्रं पाणिनिप्रणीतः अष्टाध्यायीतः **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमा**[27], सूत्रेण प्रथमाविभक्तिनिर्णयविषये उपस्थापितम्। तदैव वार्तिकेन वार्त्तिकमाधारीकृत्य **क्वचिन्निपातेनाभिधानम्**[28] इति सूत्रेण **'अव्ययोगे च'** इति सूत्रेण विरचितेन प्रथमाविभक्तिविषये आलोचितम्। यथा –

i) **अव्यययोगे च**[29]– इति प्रभृतीनां कतिपयानां योगेऽपि प्रथमाविभक्तिस्स्यात्। यथा – दशरथ इति ख्यातो नृपतिरासीत्, क्रमादमुं नारद इत्यबोधि सः[30] इति। सूत्रमिदं क्वचिन्नपातेनाभिधानम् इति वार्त्तिकमाधारीकृत्य सूत्रमिदं विरचितम्।

ii) **सम्बोधने च**[31] – सूत्रमिदं पाणिनीयव्याकरणस्य साक्षादनुकरणभूतम्। सम्बोधनं नाम अभिमुखीकरणम्। सम्बोधनेऽपि प्रथमाविभक्तिर्भवति। यथा – हे पिता !, हे राम ! इति।

---

25 . स.व्या.कौ. पृ. 465

26. स.व्या.कौ. पृ. 465

27 . अष्टा. 2–3–46

28 . वार्तिकम्

29 . स.व्या.कौ. पृ. 466

30. शिशुपालवधम्

31.अष्टा. 2–3–47

एवमेव प्रथमाविभक्तेः सप्तमीविभक्तिनिर्णयपर्यन्तं पाणिनिसूत्रं, वार्तिकमाधारीकृत्य, स्वविरचितसूत्रेण विभक्तिनिर्णयविषयम् उपस्थापितम्–

**'प्रत्यनुधिङ्निकषान्तरान्तरेणयावद्भिः'** सूत्रमिदं बहूनां सूत्राणां समाहाररूपम्। **कर्मप्रवचनीययुक्ते द्वितीया**[32], **अभितःपरितस्समयानिकषाहाप्रतियोगेऽपि**[33]**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते**[34]।। एतेषां त्रयाणां समाहारे प्रकृतसूत्रमिदं विरचितम्।**पञ्चमी विभक्ते**[35] इति सूत्रस्य स्थाने **'निकृष्टादेकोत्कर्षे'**, **न लोकाव्ययनिष्टाखलर्थतृणाम्**[36] इति सूत्रस्य स्थाने **'न निष्टायाः'**इति सरलसूत्रं विरचितेण व्याख्यौदाहरणेन पञ्चमी–विभक्तिनिर्णयविषयः उपस्थाप्यते।

**कारकनिर्णये**षट्पञ्चाशत् सूत्राणि परिलक्ष्यन्ते,**'क्रियया सह यस्य सम्बन्धः, तत्कारकमित्युच्यते'** अर्थात् **'क्रियान्वयि कारकम्'**[37]अनेन सूत्रेण कारकं निर्धारितम्।षट् कारकाणि –

**अपादान-सम्प्रदान-करणाधारकर्म्मणाम्।**
**कर्त्तुश्चान्योऽन्यसन्देहे परमेकं प्रवर्त्तते।।**[38]

पण्डित विद्यासागरमहोदयः अष्टाध्यायी सूत्रपाठक्रमेण कारकाणां व्याख्या कृता यथा – आदावपादानं विषये क्रमेण सम्प्रदानम्–करणम्–अधिकरण्–कर्म–कर्तृ इति।

अपादानकारकनिर्णये व्याकरणकौमुद्यां **'यतोविश्लेषोऽपादानम्**[39]**'** इति सूत्रं पाणिनीसूत्रे **ध्रुवमपायेऽपादानम्**[40] इति सूत्रेण अपादानसंज्ञा विधीयते। एवंरूपेण पाणिनीसूत्रे**'कर्मणायमभिप्रैति स सम्प्रदानम्**[41] सूत्रस्य स्थाने **'यस्मै दानं सम्प्रदानम्**[42]**'**, **कर्त्तुरीप्सिततमंकर्म**[43] सूत्रस्य स्थाने **'क्रिययाक्रान्तं कर्म**[44]**'**, **स्वतन्त्रः कर्त्ता**[45] सूत्रे **'क्रियासम्पादकः कर्त्ता**[46]**'** इदं सूत्रं सहजे स्मरणार्थकं विरचितेन कारकनिर्णयविषय–व्याख्येन उदाहरणेन विषय उपस्थापितः।

---

32. अष्टा. 2–3–8
33. वार्तिकम् 1442–1443
34. वार्तिकम् 1444
35. अष्टा. 2–3–42
36. अष्टा. 2–3–69
37. स.व्या.कौ. पृ. 487
38. संक्षिप्तसारव्याकरणम्
39. स.व्या.कौ. पृ. 487
40. अष्टा. 1–4–24
41. अष्टा. 1–4–32
42. स.व्या.कौ. पृ. 490

**तद्धितप्रत्यप्रकरणम् –** अस्मिन् प्रकरणे 319 सूत्रेण तद्धितप्रत्ययनिर्णयविषयः निरूपितः। तद्धितप्रत्ययः इत्युक्ते पाणिनीव्याकरणस्य **तद्धिताः**[47] इति सूत्रेण तद्धितप्रत्ययाः निरूपिताः। पाणिनीसूत्राधारेण सरल–संक्षेपः उदाहरणेन नव्यसूत्रमपि व्याकरणकौमुदीग्रन्थे विरच्य कुत्र कुत्र तद्धितप्रत्ययः भवति तद्विषये आलोचितम्। एवञ्च सूत्रं सरलीकृतं, यथा – **'णितिवृद्धिराद्यस्य'** इति सूत्रम्**अचोञ्णिति**[48], **तद्धितेष्वचामादेः**[49]**किति च**[50] एतेषां त्रयाणां सूत्राणां विषयसमाहारे प्रकृतसूत्रमिदं विरचितम्। एवं प्रकारेण **तस्यापत्यम्**[51] इति सूत्रस्य स्थाने **'अपत्ये'**सूत्रेण विषयः प्रतिपादितः।

**स्त्रीप्रत्ययप्रकरणम्** -स्त्रियां प्रत्ययाः स्त्रीप्रत्ययाः। स्त्रीरूपार्थे ये प्रत्ययाः विधीयन्ते ते स्त्रीप्रत्ययत्वेन अभिधीयन्ते। तदपि **स्त्रियाम्**[52] इत्यधिकारे पाणिनीसूत्रेण व्याकरणकौमुद्यां स्त्रीप्रत्ययः विषयः प्रतिपादितः। व्याकरणकैमुदी ग्रन्थे आचार्यः विद्यासागरमहोदयः पञ्चषष्टिः सूत्रेण स्त्रीप्रत्ययः निर्णयविषयः प्रतिपादितः। पाणिनीव्याकरणस्य दीर्घसूत्रम्**इन्द्रवरूणभवशर्व्वरूद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक्**[53] इति सूत्रस्य स्थाने **'भवादेरानीपौ'** सूत्रेण स्त्रीप्रत्ययः विषयः प्रतिपादितः। एवं रूपेण **श्वशुरस्योकाराकारलोपश्च**[54] इति वार्तिकमाधारीकृत्य **'श्वश्रः श्वशुरस्य'** सूत्रमिदं विरचितम्।

**समासप्रकरणम् -** समासनिर्णयविषये सारल्येन प्रोक्तं यत् –**"एकपदीभावःसमासः"**[55]। समासः षड् भेदाः– कर्मधारयः, तत्पुरूषः द्वन्दः, बहुव्रीहिः, द्विगु अव्ययीभावश्च। वस्तुतः कर्मधारयः द्विगु तत्पुरूषसमासस्य भेदः। समासनिर्णये अष्टादशाधिकत्रयशतं सूत्रं वर्तते। यथा –'लुग् विभक्तेः' अस्य सूत्रस्यार्थः भवति

---

43 . अष्टा. 1–4–49

44. स.व्या.कौ.पृ. 493

45 . अष्टा. 1–4–54

46. स.व्या.कौ. पृ. 496

47 . अष्टा. 4–1–76

48 . अष्टा. 7–2–115

49 . अष्टा. 7–2–117

50 . अष्टा. 7–2–118

51 . अष्टा. 4–2–92

52 . अष्टा. 4–1–3

53 . अष्टा. 4–1–49

54 . वार्तिकम्

55 . स.व्या.कौ.पृ. 601

समासान्तर्गतपदसमूहानां विभक्तीनां लोपः भवति। अस्य सूत्रस्य विषयः अष्टाध्याय्याः **सुपो धातुप्रातिपदिकयोः**[56] इत्यस्मात् सूत्रात् स्वीकृतः। एवमेव पाणिनीयव्याकरणस्य सूत्रं **न-लोपः प्रातिपदिकान्तस्य**[57] इत्यस्य स्थाने **'नस्य लोपः पूर्वस्य'**,**अव्ययंविभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद् यथानुपूर्व्वयौगपद्यसादृश्यस्पत्तिसाकल्यान्तवचनेषु**[58] सूत्रस्य स्थाने **'सुपाव्ययं समीपादौ'**, **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन**[59] सूत्रस्य स्थाने **'न पुरणार्थैः'**, **'नगुणवाचिभिः'**, **'न तृप्तर्थैः'** सूत्रत्रयं विरच्य पाणिनीसूत्रस्य विषयः प्रतिपादितः। एवंरूपेण समासप्रकरणस्य दीर्घसूत्रं सरलं खण्डनं कृत्वा समासविषये स्वयं विरचितं व्याकरणकौमुदीग्रन्थे आलोचितम्।

संस्कृतधारा अतीते वेद-रामायण-शाकुन्तलादौ काले असंख्याभिः स्त्रोतधाराभिः पुष्टशरीरा हिमालयात् बङ्गसमुद्रं यावत् प्रवहन्ती ब्रह्मपुत्रधारेव बहुव्यापिनी विस्तृतकारा आसीत्। किन्तु कालान्तरे अधुना स्वल्पधीमनुष्यानां कृते संस्कृतशिक्षा दौर्वोध्यं जटिलशुष्कप्रायेव सञ्जाता। अद्य खलु सैव क्षिप्रं शुष्यन्ती राजस्थानमरौ विलुप्ता सरस्वतीमनुसन्तरीव प्रतीयते। अनेकेषु कारणेषु संस्कृतव्याकरणस्य जटिलता दीर्घव्यापकता च अन्यतमं कारणम्। इन्द्रादयो देवाः व्यासवाल्मीक्यादयः ऋषयः महाव्याकरणकर्त्तारोऽपि संस्कृतव्याकरणस्यान्तं पारं न प्राप्तवन्तः। तस्य समग्रस्य शब्दवारिधेः प्रक्रियां शब्दव्युत्पादनविद्यां ज्ञातुं न शक्तवन्तः। महाभाष्यधृतप्रमाणं बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रप्रतिपदोक्तानां शब्दानां शाब्दपारायणं प्रोवाच नान्तं जगाम। अतः अल्पधीमनुष्याणां प्राथमिकतया व्याकरणज्ञानार्थं सहज-सरल-संक्षेपतः व्याकरणं कथनीयम्। एतदर्थं पाणिनेः परवर्त्तीकालेः बहवः वैयाकरणाः संस्कृतव्याकरणस्य सहज-सरल-रूपप्रदानार्थं प्रयत्नं कृतवन्तः। आचार्यः वरदराजः तस्य लघुसिद्धान्तकौमुद्यां मङ्गलाचरणे आह –

**नत्वां सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।**
**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।** इति।

पण्डित ईश्वरचन्द्रविद्यासागरोऽपि बङ्गभाषायां तस्य "उपक्रमणिका","व्याकरणकौमुदी" इति व्याकरणग्रन्थद्वये सहजतया सरलतया संक्षेपेण च व्याकरणस्य मूलतः पाणिनीव्याकरणस्य सूत्राणि सरलानि कृतवान्। दीर्घकारसूत्रं स्वल्पाकारं, गूढस्वल्पकायसूत्रं झटितिप्रतीत्यर्थं रूपान्तरितं नवरुपेन वा निर्मितम्। न केवलं पूर्वाचार्याणाम् अपितु अनुक्तस्थाने स्वसूत्रमपि विरचितवान्। तस्य केषु सूत्रेषु स्वातन्त्रता वर्तते। विद्यासागरस्य व्याकरणकौमुदी पण्डितानां कृते नास्ति अपि तु नवशिक्षार्थीनां कृते विद्यते। तस्य ग्रन्थः न केवलं बङ्गीयभाषीणां

---

56 . अष्टा. 2-4-71

57 . अष्टा. 8-2-7

58 . अष्टा. 2-1-6

59 . अष्टा. 2-2-11

कृते अपि तु समग्रसंस्कृतशिक्षार्थीनामपि लाभदायकं भविष्यति इति। एवमेव मया अल्पमतिना सारल्येन संक्षेपेण च यथामति लेखो विचारितः।

- **संक्षेताक्षरसूची**

अष्टा. – अष्टाध्यायी
अ.अ.वि. – अनन्य अद्वितीय विद्यासागर
रामा. – रामायणम्
पा.शि. – पाणिनीय शिक्षा
वा.भा.व्या.क्र. – वाङ्लाभाषा व्याकरण ओ क्रमविकाश
म.भा.उ.प.– महाभारतम् (उद्योगपर्वम्)
मा.र.ई.वि. – मानवरत्न ईश्वरचन्द्र विद्यासागर
स.सा.वा.दा. – संस्कृत साहित्ये वाङालीर दान
स.व्या.कौ. – समग्र व्याकरणकौमुदी
सि.कौ – सिद्धान्तकौमुदी

- **सहायकग्रन्थसूची**


1. अनन्य अद्वितीय विद्यासागर – अमलेश मिश्र, दे पावलिकेशन्स, कलिकाता – 2019
2. अष्टाध्यायी- डा. नरेश झा, चौखम्बा सुरभारती प्रकाशन्, वाराणसी – 2006
3. वाङ्लाभाषा व्याकरण ओ क्रमविकाश –डा. निर्मल दाश, संस्कृत पुस्तक भाण्डार, कलिकाता – 2003
4. महाभारतम् – सम्पा. उषा शर्मा, मानसी प्रकाशन्, मीरट – 1990
5. मानवरत्न ईश्वचन्द्र–विद्यासागर – मौसम मजुमदार, तपती पाबलिकेशन्स, कलिकाता – 2019
6. सिद्धान्तकौमुदी (मूलमात्रम्) –सम्पा. गोविन्दाचार्यः, चोखम्बा सुरभारती प्रकाशन्, वाराणसी 2015
7. संस्कृत व्याकरणस्योपक्रमणिका – पं. गोपालचन्द्र वेदान्तशास्त्री, चोखम्बा विद्याभवन, वाराणसी 1961
8. संस्कृत व्याकरणकौमुदी – पं. गोपालचन्द्र वेदान्तशास्त्री, चौखम्बा विद्याभवन, वाराणसी 1962
9. संस्कृत व्याकरण प्रवेशिका (ईश्वचन्द्र–विद्यासागर प्रणीत संस्कृत व्याकरण उपक्रमणिका ग्रन्थस्य संस्करणम्) – सम्पा. रमेश भरद्वाज, श्री वत्सशास्त्री, अमरजी झा, विद्यानिधि प्रकाशन, दिल्ली 2009
10. संस्कृत व्याकरण उपक्रमणिका – ईश्वरचन्द्र विद्यासागर, संस्कृतयन्त्रः, कलिकाता – 1908
11. समग्र व्याकरणकौमुदी – श्रीयुक्त दुर्गाचरण सांख्य–वेदान्ततीर्थ, संस्कृत पुस्तक भाण्डार, कलिकाता – 2010
12. संस्कृत व्याकरणशास्त्रेतिहासविमर्शः – डा. अशोकचन्द्र गौड शास्त्री, भारतीय विद्यासंस्थानम्, वाराणसी 1977
13. संस्कृत साहित्ये बाङालीरदान – सुरेशचन्द्र वन्दोपाध्याय, संस्कृत पुस्तक भाण्डार, कलिकाता – 1369 बङ्गाब्दः
14. संस्कृत साहित्येर इतिवृत्तः – डा. गोपेन्दु मुख्योपाध्याय, इउनाइटेड वुक एजेन्सी, कलिकाता 1419 बङ्गाब्दः
15. Sanskrit Culture of Bengal – Suresh Chandra Banerjee, Sharada Publishing House, Delhi 2004

Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# संस्कृतशिक्षणे व्याकरणानुवादविधेः योगदानम्

## The Role of Grammar Translation Method in Sanskrit Teaching.

**डा. विश्वजित् प्रामाणिकः**
अनौपचारिकसंस्कृतशिक्षकः, मुक्तस्वाध्यायपीठम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, जनकपुरी, नवदेहली

**सारांशः-** संस्कृतशिक्षणे बहूनां विधीनाम् उपयोगः क्रियते। एतेषु विधिषु व्याकरणानुवादविधिः कश्चन विशेषः विधिः वर्तते। व्याकरणनियमान् आश्रित्य अनुवादपद्धत्या अत्र भाषाणां शिक्षणं दीयते। आदौ कश्चन अध्येता मातृभाषायां संस्कृतभाषायां वा विद्यमानस्य भागस्य अनुवादं करोति। अनुवादकरणसमये सः अध्येता आचार्यान् पृष्ट्वा अनुवाददोषान् दूरीकर्तुं व्याकरणस्य आश्रयं स्वीकरोति। व्याकरणस्य नियमानाम् आश्रयेण वाक्यानि शुद्धानि करोति। तदवसरे अध्येता व्याकरणाध्ययनमपि साधयति। एवम् उक्तां प्रक्रियाम् आदाय अयं विधिः कार्यं विधत्ते इति कारणात् अस्य विधेः नाम व्याकरणानुवादविधिः। वैदेशिकभाषाणाम् अध्यापनार्थम् अस्य विधेः आविष्कारः अभूत्। विशिष्य लैटिन, फ्रेन्च इत्यादयः भाषाः अनेन विधिना पाठ्यन्ते स्म। क्रमशः संस्कृताध्ययनमपि अनेन विधिना क्रियते। भण्डारकरवर्यः अस्य विधेः आवश्यकताम् अनुभूय प्रप्रथमम् आरब्धवान् इति कारणात् अस्य विधेः नाम भण्डारकरविधिः इत्यपि उच्यते। संस्कृतशिक्षणे महत् उपकरोति अयं विधिः।कश्चन मातृभाषाभाषी जनः यदि संस्कृताध्ययनं कर्तुं वाञ्छति तर्हि अनेन विधिना तत् साधयितुं शक्नोति। नूतनसंस्कृताध्येतारः अनेन विधिना बहुधा संस्कृताध्ययनार्थं प्रवर्तते। यद्यपि अत्र केवलं व्याकरणस्य अनुवादस्य च महत्त्वं दीयते, रसानुभूतिः न भवति, छात्रकेन्द्री वर्तते अयं विधिः तथापि क्रमशः सावकाशम् अनेन विधिना संस्कृताध्ययनं कार्यते चेत् संस्कृताध्ययनक्षेत्रे महान् विकासः भवितुम् अर्हति। एतद्विधिप्रयोगकारणात् अध्येता द्विधा लाभं प्राप्तुम् अर्हति। अध्येता अनुवादमपि शिक्षते पुनश्च व्याकरणस्य प्रयोगान् सूत्राणां कण्ठस्थीकरणादिकमपि जानाति। एवं वर्तते संस्कृतव्याकरणानुवादविधिः।

**मुख्यभूतशब्दाः**– व्याकरणम्, अनुवादः, विधिः, भण्डारकरविधिः, संस्कृतशिक्षणम्

---

**उपोद्घातः-** अधिगमकारणीभूतं सहायकम् अभिवर्धकञ्चशिक्षणं सार्थकशिक्षणम् उच्यते। योजनापुरस्सरं रोचकं सक्रमञ्च सार्थकशिक्षणं नूनं प्रत्येकस्मिन् अध्येतरि सुष्ठुअधिगमं जनयेत्। यथाप्रत्येकमपि सार्थकशिक्षणं सुशिक्षणं वा विध्याश्रितं सत् कक्षासु सम्प्रवर्तेत।तस्मात् शिक्षणे विविधविधयः परिकल्पिताः सुचिन्तिताः प्रयुक्ताः प्रवर्तिताः प्रवर्धिताश्च सन्ति।विविधेऽस्मिन् शिक्षणप्रकरणे विधयःशिक्षणप्रकृतिम् अनुसृत्य परिवर्तन्ते। यथा शिक्षणविषयः तथा शिक्षणविधिः। सम्प्रति शिक्षाक्षेत्रे विविधशिक्षणप्रविधीनाम् उपयोगः जायमानः अस्ति, येषां प्रयोगेण प्रत्येकमपि शिक्षणं रोचकं प्रभावपूर्णं च भवितुम् अर्हति। अनेन शिक्षणे सजीवता आयाति, वैविध्यं दृश्यते, रोचकता जायते,

